ध्यायन्ति घातैश्च न चोद्विजन्ते
भयावहास्ते समरे नृपाणाम् ॥
शोकं शूलं भयं लज्जामालस्यं चैवमादिषु ।
मुकुलं तं विजानीयादलं पर्य्याणवारणे ॥
स्थाणुकण्टकवृत्तैश्च सुधाखदिरकण्टकैः ।
स्वामिघाताय चादत्ते तेषां रूपमिदं शृणु ॥
वानरोलूकमार्जारतरक्षुगण्डलोचनाः ।
गतिर्वा यसुरैस्तुल्या स्थूलमेढ्रशिरान्विताः ॥
लम्बौष्ठकर्णनासाश्च कृतघ्नाहीनाधिकद्विजाः ।
विच्छिन्नप्रोथगण्डा ये भ्रुकुटीचित्रमेहनाः ॥
एते दोषास्तथान्येऽपि सुकुलाश्वसमुद्भवाः ।
खलानामिह राजेन्द्र! वक्तुं शक्या न मादृशैः ॥
लक्ष्यं प्रधानमित्येके चान्ये लक्षणमाश्रिताः ।
लक्ष्यलक्षणमेतेषां तेनेदं दुष्करं विदुः ॥
अथाश्मिरतिसंक्षेपादतियान्मि विस्तरात् ।
मुनीनामेकवाक्यत्वाद् ब्रूयामः स्थितिदुष्कराः ॥
सत्ववर्णगतिच्छायास्वरस्थानगतिः कुलम् ।
पुण्यं पुण्डकनामानि दोषं वा जवलक्षणम् ॥
एवं लक्षणसंयुक्तं दृश्यते शूररक्षणे ।
लक्षणेन विहीना ये निर्दोषाःस्युः प्रधाविताः ॥
हयरोहस्य का चिन्ता लक्षणैः शुभनिन्दितैः ।
तेनात्र न कृतोऽस्माभिर्हयलक्षणविस्तरः ॥
हयवाहनविज्ञानं कौतुकाद्धितदुह्यः ।
अनायासेन गच्छन्ति परं दृष्टा इमे जनाः ॥
चलासनं कशा रागाः पाणिघातप्रतोदनम् ।
पदप्रघातसंज्ञानि दोषो यैरुपजायते ॥
कामात् कोपाद्भयान्मोहाद्दर्पाच्चैव मदाश्रयात् ।
पर्य्याणारोहदोषाच्च दुष्यन्त्यश्वा निसर्गतः ॥
श्रीयुक्तसामन्तनरेन्द्रवन्दितं
रणे हयारोहवराभिनन्दितम् ।
धर्म्मार्थकामादियशःप्रधान-
मित्थं कृतं वाहनशास्त्रविस्तरम् ॥
इति श्रीनकुलकृतेऽश्वचिकित्सिते वाहनाध्यायो नवमः ॥

अथ धातुपरीक्षा ।

अथातः संप्रवक्ष्यामि धातूनां लक्षणं परम् ।
येन विज्ञानमात्रेण ज्ञायन्ते रोगसम्भवाः ॥
ततः शुद्धशरीरोत्थरक्तदोषानवाप्नुयात् ।
रक्तदोषात्तदा वाजी प्राप्नोत्येव महामयान् ।
तस्मात् सर्व्वप्रयत्नेन रक्तं ज्ञेयं विचक्षणैः ।
आषाढ़समये प्राप्ते शिरामोक्षेण कृतश्रमः ॥
तेन संशोध्यते रक्तं वाजिनां दोषसम्भवम् ।
ततः शुद्धशरीरोऽपि पिण्डाद्यैश्च बलीकृतः ॥
श्रावणे शस्यमासाद्य वज्रवत् सुदृढ़ो भवेत् ।
यदि रक्ताधिको वाजी शस्यमश्नाति कर्हिचित् ॥
रक्तात् सञ्जायते पित्तं ततो नाशमवाप्नुयात् ।
रक्ताधिकश्वासपुटः स्नेहाद्यैः शस्यमत्ति चेत् ॥
संप्राप्य श्लेष्मरिचाद्यो नाशमवाप्नुयात् ।
हीनरक्तो यदा शस्यं रूक्षोऽश्नाति तुरङ्गमः ॥
तदा वायुं परं प्राप्य सद्यो नाशमवाप्नुयात् ।
तदिदं लक्षणं प्रोक्तं रक्तकोपसमुद्भवम् ॥
धातूनामपि सर्व्वेषां ज्ञेयमिदं विचक्षणैः ।
पित्तरक्तप्रकोपेण यदा संपीड्यते हयः ॥
तदा कण्डूतिमासाद्य कषते सततं वपुः ।
छायां वाञ्छति यत्नेन विशेषेण जलाश्रयम् ॥
मुहुर्वाञ्छति पानीयमाहारञ्च विशेषतः ।
एवं वातोत्थरक्तेन ज्ञात्वाश्वम्पीड़ितं ततः ॥
शिरामोक्षं विधायैव दद्यात् सकटुकं गुड़म् ।
ततः शुद्धिमवाप्नोति नीरोगः संप्रपद्यते ॥
पित्तासृग्दूषितो वाजी यदि चाश्रूणि मुञ्चति ।
नेत्रान्ते पाण्डुरत्वञ्च सद्यो मृत्युमवाप्नुयात् ॥
नेत्रयोर्लक्षणं प्रोक्तं पित्तरक्तसमुद्भवम् ।
श्लेष्मरक्तप्रकोपेण यदा सम्पीड्यते हयः ॥
अधोवक्त्रो भवेन्नित्यं कासते च मुहुर्मुहुः ।
आहारं न च गृह्णाति नोत्साहं कुरुते क्वचित् ॥
न विन्दति कशाघातं न च पार्ष्णिं न चासनम् ।
नासाग्रेण क्षिपेत्तोयं वह्निघर्म्मञ्च वाञ्छति ॥
तस्यापि शोधयित्वाऽसृग् दद्यात्कृष्णायुतं गुड़म् ।
सर्व्वं रक्तं ततः शुद्धा निःशेषं समवाप्नुयात् ॥
वाजिनः श्लेष्मरक्ताभ्यां दूषितस्य सदा भवेत् ।
नेत्रान्ते बिन्दुकाकारकण्डूस्तस्य तथोदरे ॥
तदा मृत्युमवाप्नोति षण्मासाभ्यन्तरे ध्रुवम् ॥
शुण्ठ्यम्लता गोक्षुरक घनञ्च
श्यामावचाहिङ्गुयुता च यष्टिः ।
कफप्रणाशाय विनिर्मितोऽयं
पिण्डः प्रसिद्धश्च कफापहश्च ॥
नोचेदश्नाति शुण्ठ्याढ्यं सैन्धवं नस्यमार्गतः ।
वायुरक्तप्रकोपेण पीड़ितस्तु तुरङ्गमः ॥
कुक्षिद्वये हयस्तीव्रं मुहुः श्वासं प्रमुञ्चति ॥
नैकत्र मन्यते स्थातुं क्षिपते च निरर्गलम् ।
एवं वातोद्भवं ज्ञात्वा रक्तन्देहे हयस्य च ॥
शोधयित्वाथ सन्दद्यान्महाघृतमनल्पकम् ।
ततः शुद्धिमवाप्नोति परां पुष्टिञ्च गच्छति ॥
उत्साहं कुरुते मार्गे सर्व्वदोषविवर्ज्जितः ।
वातरक्तप्रकोपेण लोचनान्तं हयस्य च ॥
यदा स्यातां सिते रक्ते कासः कण्डूस्तथानने ।
तदा तस्य भवेन्मृत्युर्यदि नाश्नाति चामिषम् ॥
अम्लसक्च युतन्दद्या माहिषेण निशागमे ।
सन्निपातेऽथ रक्तेन यदा सम्पीड्यते हयः ॥
यदा वेपथुमाप्नोति काशते च निरर्गलम् ।
निद्रालस्याग्निमन्दत्वं वस्तौ मलनिबन्धनम् ॥
कर्णयोः पातनञ्चैव वक्त्राल्लालाविमोक्षणम् ।
तत्रापि शोधयेद्रक्तं ततो लङ्घनमर्हति ॥
यावद्दोषस्य निर्णाशं स्तोकोदककृताशनः ।
क्वचिदुष्णं क्वचिच्छीतं क्वचिद्विषजसंयुतम् ॥
प्रदेयं युक्तितत्वज्ञैर्वारि वार्य्यं न कुत्रचित् ।
सपथ्या चाम्लता चैव कटुका च वचा तथा ॥
शामयेत्तत्क्षणादेव त्रिधातुकुपितं ज्वरम् ।
शिरीषं श्रीफलञ्चैव वेतसञ्चैव वृद्धिभाक् ॥
मन्दाग्नित्वं सदोषाणां कुरुते भस्मसाद्द्रुतम् ।
मधुकं मधुजालञ्च माधुर्य्यं कुलिकान्वितम् ॥
शिरीषं क्षुद्रकं लाक्षां क्राथयित्वा विभागतः ।
यस्यैतत् सन्निपाताय वाजिनः संप्रदीयते ॥
तस्य तन्नाशमायाति तमः सूर्य्योदये यथा ।
यस्यस्यापि हि नेत्रान्ते स्यातां नीले च वाजिनः ॥
गन्धश्च सदृशः घोणया तदा मृत्युर्द्विमासिकः ।
नीले पीतेऽथ नेत्रान्ते स्यातां चेद्वाजिनः क्वचित् ।
स निर्वाणमवाप्नोति त्रिभिर्मासैरसंशयम् ॥
यस्य नेत्रान्तरे रेखा बहुवर्णा प्रजायते ।
विशेषात् स्वरभेदः स्यात्तस्यायुः पाञ्चमासिकम् ॥
जिह्वायां जायते बिन्दुरकस्माद् यस्य वाजिनः ।
कृच्छ्रञ्च जीवते मासं स वाजी नात्र संशयः ॥
पीतो मासद्वयेनैव सप्तैर्व्वा प्रयच्छति ।
त्रिभिर्मासैस्तथारक्तश्चतुर्भिश्च विचित्रितः ॥
पञ्चभिर्नीलवर्णश्च षड्भिर्व्विषमाकृतिः ।
सप्तभिः पाटलाकारश्चम्पकाभस्तथाष्टभिः ॥
नवभिश्च हरिद्राभो दशभिर्जम्बुकोपमः ।
एकादशभिर्दूर्व्वाभो वत्सरेण हिमद्युतिः ॥
यस्य श्वासो भवेदुष्णः शरीरं पुलकाङ्कितम् ।
जिह्वा हिमकराकारा मासषट्कं स जीवति ॥
ग्रीवाग्रे पिण्डिका यस्य जायते च तथाधरे ।
मूत्रं करोति रक्ताढ्यं मासषट्कं स जीवति ॥
वर्णः श्वेतो यदा यस्य नेत्रयोश्च प्रजायते ॥
दशमासान् समासाद्य पित्तार्त्तो न स जीवति ।
यस्य नीलप्रभे स्यातां नेत्रे वाताहितस्य तु ।
मासत्रयञ्च कृच्छ्रेण यः सप्तिः स न जीवति ॥
श्लेष्मयुक्तस्य वा रक्ते यदि स्यातां विलोचने ।
वक्त्रगन्धः सुरातुल्यो दश मासान् स जीवति ॥
यस्य नेत्रे हरिद्राभे स्यातां पित्ताहितस्य च ।
तस्यायुः सप्तमासाख्यं मुनिभिः परिकीर्त्तितम् ॥
बहुवर्णे घने नेत्रे स्यातां धातुसमागमे ।
तस्य सप्तैर्भवेन्मृत्युः सप्तरात्रादसंशयम् ॥
यस्यैकं लोचनं नीलं द्वितीयं रक्तसन्निभम् ।
दृश्यते स च विज्ञेयः पित्ताढ्यो मासजीवकः ॥
यस्य पित्तप्रसक्तस्य काले नीरदवर्त्तिनि ।
हयस्य जीवितं तावद्दिनानि दश पञ्च च ॥
एवं रक्तविकाराणां ज्ञात्वा धातुं तुरङ्गमे ।
ततः प्रतिक्रिया कार्य्या उक्ता या कीर्त्तिता परा ॥
भयादपीतपानीयशीतविशीर्णयुतस्य च ।
आर्त्तोऽपि ताड़ितोऽत्यर्थं तिर्य्यग्विद्धो यदापि वा ॥
श्रमाङ्गराच्च बन्धाद्वा गात्रे वा विषमस्थिते ।
क्षीणशोणितमांसस्य शिरावेधः प्रशस्यते ॥
इति श्रीनकुलकृतेऽश्वचिकित्सिते धातुपरीक्षाध्यायो दशमः ॥

अथ ऋतुचर्य्या ।

द्वासप्ततिसहस्राणि नाड़ीनां हि भवन्ति च ।
वाजिनामिह सर्व्वासां वायुरक्तं व्यवस्थितम् ॥
तासां निर्म्मोचनार्थाय द्वाराण्यष्टौ वदाम्यहम् ।
येर्याति कुत्सितं रक्तं सर्व्वदेहसमुद्भवम् ॥
कण्ठे वक्षसि तालौ च नासयोश्च मुखे तथा ।
अक्ष्णोरथ पादेषु पादयोरुभयोरपि ॥
कालं बलञ्च विज्ञाय वाजिनां भिषगुत्तमः ।
शिरामोक्षं प्रकुर्व्वीत स्थानेष्वेतेषु पण्डितः ॥
अन्ये सप्तदश प्राहुः शिराद्वाराणि वाजिनः ।
विकारयुक्तं यद्रक्तं सुस्वल्पमपि वर्जयेत् ॥
एवं शरदि यः सम्यक् पुष्टिं नयति वाजिनाम् ।